श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री नृसिंहमङ्गळनवरत्नमालिका ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री नृसिंहमङ्गळनवरत्नमालिका ॥

मङ्गळं स्तंभडिंभाय मङ्गळं मृत्युमृत्यवे।
मङ्गळं रौद्ररूपाय नरसिंहाय मङ्गळम् ॥ 1 ॥

हिरण्यकशिपुं हत्वा दैत्येन्द्रं देवकण्टकम्।
जगद्रक्षण धुर्याय जगद्बीजाय मङ्गळम् ॥ 2 ॥

प्रह्लाद स्तुति सन्तुष्ट प्रसन्न निजमूर्तये।
वरदाभय हस्ताय वरदाय च मङ्गळम् ॥ 3 ॥

कराग्रैः वज्रसंस्पर्शैः नखरैः शत्रुधारिणे।
तीक्ष्णदंष्ट्राय तत्वाय तार्क्ष्यवाहाय मङ्गळम् ॥ 4 ॥

नरकण्ठीरवाकार व्यक्तात्युग्र विभूतये।
मृगेन्द्राय नरेन्द्राय दैवतेन्द्राय मङ्गळम् ॥ 5 ॥

किरीटहारकेयूर कुण्डलालङ्कृताय च।
कोटिसूर्य प्रकाशाय देवसिंहाय मङ्गळम् ॥ 6 ॥

त्रियुगाय त्रिपृष्ठाय त्रिगुणाय त्रिमूर्तये।
नरकेसरिरूपाय लक्ष्मीलोलाय मङ्गळम् ॥ 7 ॥

मत्स्यकच्छप वाराह सिंह वामन मूर्तये।
राम कृष्णात्मने बौद्ध कल्कि सिंहाय मङ्गळम् ॥ 8 ॥

सर्वबीजाय सत्याय सर्वाधिष्ठान मूर्तये।
सर्वेश्वराय सर्वस्मै सत्वसिंहाय मङ्गळम् ॥ 9 ॥

॥ श्री नृसिंहमङ्गळनवरत्नमालिका समाप्ता ॥